# प्रत्याहारसूत्राणां समीक्षणात्मकमध्ययनम्

सुमनखतिवडा *

**सारः**

*वेदस्य षट्स्वङ्गेषु व्याकरणम् शरीरस्य मुखमिव मुख्यमस्ति । वेदार्थपरिज्ञानाय च व्याकरणमध्येयं वर्तते । तत्राचार्यस्य पाणिनेः अष्टाध्यायी नामकः सूत्रात्मकः व्याकरणविषयकः ग्रन्थः कालजयी परिपूर्णः स्फुटतरश्च विराजते । अइउण्, ऋलृक् इत्यादीनि चतुर्दश माहेश्वरसूत्राणि पाणिनीयव्याकरणस्याधारभूतानि उपजीव्यभूतानि विद्यन्ते । एभिः सूत्रैः प्रत्याहाराणाम् निर्माणं भवति । प्रत्याहारो नाम वर्णसंक्षेपः विद्यते । प्रत्याहाराश्च पाणिनीयसूत्राणामाधारः वर्तते । यथा - इको यणचि (पा.सू.६।१।७७) अत्र प्रत्याहारौ इक् ( इ,उ,ऋ,लृ, ) यण् (य,व,र,ल) इति । वर्णसमाम्नाय नाम्ना चैतानि ज्ञायन्ते । एतानि सूत्राणि पाणिनियानि पाणिनिप्रणीतानि सन्ति । पाणिनीयव्याकरणशास्त्रानुशासनस्य प्राणभूतानीमानि सूत्राणि प्राचीनवाङ्मयेषु ऋक्प्रातिशाख्ये भाष्यादौ च वेदवत् ब्रह्मराशिरूपेण समादृतानि प्राप्यन्ते । प्रत्याहाराश्च पाणिनीयसूत्रेषु प्रतिसूत्रं राजन्ते । सूत्रेष्वन्तर्भूताः द्वाचत्वारिंशत् (४२) प्रत्याहाराः लभ्यन्ते । तदितरं कात्यानकृतेषु वार्तिकेषु च प्रत्याहाराणामुपयोगो विहितो विद्यते । काशिकाकारादयस्त्वेनं गोपर्वते पाणिनिकृतेन तपासा प्रसन्नस्य महेश्वरस्य ढक्कानादात् पाणिनिना सूत्राणि प्राप्तानि सन्तीति निगदन्ति । महेश्वरवरप्रसादात् ढक्कानादोद्भवानि सूत्राणि समाख्याय पाणिनिः व्याकरणशास्त्रं प्रणिनाय इति च प्रसिद्धिरस्ति । अस्मिन्नालेखे सूत्राणां परिचयोपस्थानपूर्वकं प्रत्याहाराणां संख्यायाश्च निदर्शनं क्रियते । इमानि सूत्राणि पाणिनीयानि उत अपाणिनीयानि (माहेश्वराणीति) वस्तुसत्यमुपस्थाप्य ववेचनं विहितमस्ति । पाणिनीयेषु सूत्रेषु प्रयुक्तानां प्रत्याहाराणां संख्या च सदैव विवेचनस्य विषयभूतो विद्यते ।*

**शब्दकुञ्जिका -** प्रत्याहारः, वर्णसमाम्नायः, ब्रह्मराशिः, जिह्वामूलीयः, पाणिनीयम् ।

## १. विषयप्रवेशः

संस्कृतवाङ्मयस्य प्रधानभूतम् व्याकरणशास्त्रम् शिक्षा-कल्प-व्याकरणम्-निरुक्तम्-छन्दः-ज्यौतिषमिति षट्सु वेदाङ्गेषु प्रामुख्यमावहति । तत्रमहाभाष्यकारः पतञ्जलिरप्याह- मुखं व्याकरणं स्मृतमिति । शरीरस्य विविधेष्वङ्गेषु मध्ये यथा मुखस्य प्रधानता सर्वोपरि भवति तथैव षट्सु वेदाङ्गेषु मध्ये व्याकरणस्यापि प्रधानता निगदिता विद्यते । व्याकरणस्य महत्त्वं प्रतिपादयन् भर्तृहरिकृतवाक्यपदीयस्याज्ञातनामा टीकाकारोऽप्याह -

आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमञ्चमन्त्राः ।
तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराह ॥ (वाक्यपदीयम् )

संस्कृतभाषायाः वैयाकरणपरम्परायाम् महर्षे पाणिनेः विशिष्टं योगदानमस्ति । पाणिनिना प्रोक्तं व्याकरणं पाणिनीयम् निगद्यते । वैयाकरणमुदाये खलु पाणिनिः सर्वमान्यः सिन्धौ इन्दुरिवाभाति । तस्याष्टाध्यायी व्याकरणविषयसम्बद्धा सूत्रात्मकशैलीयुता प्रसिद्धा कृतिः विद्यते । पाणिनीयव्याकरणस्याधारभूतानि चतर्दर्दश माहेश्वरसूत्राणि सन्ति । एषः सूत्रराशिः वर्णसमाम्नायः निगद्यते ।

---

* *उपप्राध्यापकः ने.सं.वि.पिण्डेश्वरविद्यापीठम् धरानः ।*

तैः सूत्रैः वर्णानाम् संक्षिप्य प्रत्याहारः निर्मीयते । सूत्राणीमानि पाणिनीयानि उत वा नेतिजिज्ञासायाः विषयः वर्तते, तदत्रविविच्यते ।

**२. समस्याकथनम्**

पाणिनीयेषु सूत्रेषु विभिन्नेषु शास्त्रेषु विविधाः धारणाः प्राप्यन्ते । ताः धारणाः एकत्र नोपलभ्यन्ते । वर्णसमाम्नायसम्बद्धा अनेकेः विषयाः प्रकाशयितव्याः सन्ति । ता एवास्यालेखस्य समस्याः विद्यन्ते । ताश्चाधः सूत्रसरण्यां निर्दिश्यन्ते -

क. वर्णसमाम्नायस्येतिवृत्तः कः ?

ख. प्रत्याहाराणाञ्च परिचयः कः ? संख्या च कति विद्यते ?

ग. प्रत्याहारसूत्राणां रचयिता कः ?

**३. उद्देश्यनिर्धारणम्**

अइउण्, ऋलृक् इत्यादीनि सूत्राणि पाणिनीयव्याकरणस्याधारभूतानि सन्ति । सूत्राणां प्रत्उयाहाराणाञ्च परिचयोपस्थापनपूर्वकम् प्रत्याहाराणं संख्या निर्धारणमस्याध्ययनस्योद्देश्यमस्ति । सूत्राणीमानि केन रचितानीति विषयस्य विवेचनमप्यस्योद्देश्यं विद्यते । समस्याकथने समुत्थापिनां समस्यानां प्राज्ञिकं समाधानमेवास्योद्देश्यं वर्तते । सूत्रसरण्यामुद्देश्यानि प्रस्तूयन्ते -

क. वर्णसमाम्नायस्येतिवृत्तप्रकानम् ,

ख) प्रत्याहाराणां परिचयमुपस्थाप्य संख्यायाः विषयविवेचनम् ,

ग) वर्णसमाम्नायस्थानां सूत्राणां रचयिताविषयकमतप्रकाशनम् ।

**४. प्रत्याहारसूत्राणि**

पाणिनीयव्याकरणस्याधारभूतानि तत्त्वानि चतुर्दश माहेश्वरसूत्राणीमानि सन्ति - १ अइउण् २ ऋलृक् ३ एओङ ४ ऐऔच् ५ हयवरट् ६ लण् ७ ञमङणनम् ८ झभञ् ९ घढधष् १० जबगडदश् ११ खफछठथचटतव् १२ कपय् १३ शषसर् १४ हल् । इति । अस्यापरं नाम वर्णसमाम्नाय इत्यप्यस्ति । अत्र पाणिनिना स्वरवर्णाः व्यञ्जनवर्णाश्च निर्दिष्टाः सन्ति । प्रत्याहारनिर्माणमेवास्य प्रयोजनमस्ति । प्रत्याहारं नाम वार्णानाम् संक्षिप्तं रूपम् । लाघवप्रियाः वैयाकणाः अस्य वर्णसमाम्नायस्य वेदवत् पावनत्वं स्वीकुर्वन्ति । उक्तञ्च भाष्यकृता - 'सो यमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः सर्ववेदपुण्यफला-वाप्तिश्चास्य ज्ञाने भवति । मातापिरौ चास्य स्वर्गे लोके महीयते' इति पातञ्जलभाष्ये । पूर्वोक्तेषु चतुर्दशसूत्रेषु ण् क्, च् ट् इत्यादयोऽनुबन्धाः पठिताः सन्ति । उषु सूत्रेषु केल चत्वारिंशत् वर्णाः सन्ति । अनुबनधाः प्रत्याहारान् सम्पादयन्ति । पाणिनीयशिक्षायां तत्र त्रिषण्ठीः चतुष्षष्ठीर्वा वार्णाः पठिताः सन्ति । उत्तञ्च- त्रिषष्ठीचर्तुषष्ठीर्वा वर्णाः शम्भुमते स्थिताः । (सिग्द्यालः ५) एते च अइउवार्णानाम् ह्रस्वदीर्घप्लुतभेदेन, लृकारस्य हस्वप्लुतभेदेन, एओऐऔ वार्णानां दीर्घप्लुतभेदेन तथा स्पर्शानां पञ्चविंशति, यादयो अष्टौ, यमाः चत्वारः, अनुस्वारविसर्गजिह्वामूलीय-विसर्गोपध्मानीयनानां मेलनेन चतुष्ष्ठी वार्णाः भवन्ति । लोके शास्त्रे च एते वर्णाः सन्तीति ज्ञायते । शुक्लयजुः प्रातिशाख्ये हुमितिनासिक्येन सह पञ्चषष्ठी वर्णाः वर्णिताः प्राप्यन्ते ।

## ५. प्रत्याहारलक्षणम्

प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः यत्र इति प्रत्याहारः । चतुर्दशसूत्रेषु विवक्षितवर्णानां संक्षिप्तरूपःप्रत्याहारः । यथा हि लोके तवाभिधानांदित्याद्यक्षरमात्रेणापि तार्क्ष्यवासुकिबोधो भवति तथैव व्याकरणे ऽपि आद्यन्तवर्णानां सङ्केतेन आदिमध्वर्णानां बोधो भवति । सूत्रान्तस्थानामनुबन्धवर्णानां तु प्रत्याहारे गणना नैव भवति । अत्र प्रमाणन्तु मुखनासिकावचनोऽ नुनासिकः यति पाणिनिनिर्दिष्टसूत्रमेव । यदि सानुबन्धसहितनां प्रत्याहारः स्यात् तर्हि अनुनासिकः इत्यत्र यगापत्तिः स्यात् अत्र ककारस्याचि ग्रहणेन यगापत्यादयो नोपपद्यते । उक्तञ्च वार्तिककृता -प्रत्याहरेऽनुबन्धानां कथमज्ग्रहणेषु नेति । (सिग्द्याल:२०१७)

## ६. प्रत्याहारसंख्यानिर्धारणम् ।

वर्णानां संक्षेपीकरणमेव प्रत्याहारः इति पूर्वमेवोक्तम् । अस्य संख्याविषये मतैक्यं न विद्यते । शब्दरन्त्ने कारिकायां प्रत्याहाराः परिगणिताः सन्ति

एकस्मान् ङञणटवटैः षेण द्वौ त्रय इह कणमाभ्याम् ॥

चत्वारस्तु चमाभ्यां पञ्चयराभ्यां शलाभ्यां षट् ॥ (सिग्द्याल २०१७)

अयमाशयः ङञणवटान्ताः अङ्, यञ्, अण्, छव्, अट् इति एकैकसंख्यात्मकं, षान्तौ झष्भषौ द्वौ, कणमान्ताः त्रयः अक्, इक्, उक्, अण्, इण् उण्, अम्,यम्, ङम् इतिचत्वारः यरान्ताः अय्, मय्, झय्, खय्, चय् , अर्, खर, शर्, झर्, चर् पञ्च , शलान्ताःअश् वश् जश् झश् हश् तथा अल् हल्, झल्, वल् शल् इतिप्रत्याहारैस्तथा र प्रत्याहारेण सह चतुश्चत्वारिंशत् प्रत्याहाराः सन्ति । प्रत्याहारेण वर्णातिरिक्तं सुप् तिङादीनामपिबोधो भवति ।

प्रत्याहारविषये एषाकारिका च प्रसिद्धावर्तते

एकस्माण्णङटञवा द्वाभ्यां षस्त्रिभ्यएव कणमाः स्युः ।

ज्ञेयो चयौ चतुर्भ्यो र पञ्चभ्यः शलो षड्भ्यः ॥

ञमन्ताड्ङः ररलौ चेति ञमेकोऽपर ऊहितः ।

प्रत्याहाराः भवन्त्येवं चत्वारिंशच्च पञ्च च ॥ (पाण्डेयः, प्रौढमनोरमा टीकायाम् २०३६)

## ७. प्रत्याहारसूत्राणि पाणिनीयानि उत अपाणिनीयानि

अत्र पूर्वोक्तानि अइउण् इत्यादीनि चतुर्दशसूत्राणि पाणिनि प्रणितानि अथवा ततः पूर्ववर्तिर्भिराचार्यैः प्रणितानीति विषयं विचार्यते । सिद्धान्तकौमुदीग्रन्थस्य रचयिता भट्टोजीदीक्षितस्तथानन्दिकेशरः इमानि सूत्राणि महेश्वर रचितानि स्वीकुरुतः । तावाह - इमानि सूत्राणि माहेश्वराणीति । एतेषां मते महेश्वर एव पाणिनेराचार्यस्य गुरुरासीत् । नन्दिकेश्वरेण काशिकायामाह -

नृत्तावासने नटराजारजो ननाद ढक्कां नवपञ्चबारम् ।

उद्धर्तुकामः सनकादिसिद्धान्नेतद् विमर्शे शिवसूत्रजालम् । (काशिका, दर्शनके. व्या. १)

एतेन स्पष्टं भवति अइउण् इत्यादीनि सूत्राणि महेश्वररचितानि । तत एव पाणिनिना गृहीतानीति ।
प्रत्याहारसूत्राणि अपाणिनीयीति भ्रान्तेरन्यानि कारणानि सन्ति तानि साधारणानि सन्ति ।
आचार्येण पाणिनिना स्वकीयांमष्टाध्याय्यां सूत्राणि नोल्लिखितानि । तत्र वृद्धिरादैच् १ ।१। १ सूत्रतः आरभ्य अ अ ८।४। ६८ सूत्राणि एव ग्रथितानि दृश्यन्ते ।

महाभाष्यकारः पतञ्जलिरपि वृद्धिः शब्दः मंगलार्थमादौ पठितः इति व्याख्यानं करोति तथा च अथ शब्दानुशासनम् नाम सूत्रमादौ व्याख्याति । तस्मादर्वाचीनाः वैयाकरणाः भ्रान्तिमन्त बभूवुः प्रत्याहार सूत्राणि तथा अथ शब्दानुशासनमिति नैव पाणिनीयानि सूत्राणीति । इमानि तु माहेश्वर सूत्राणीति ।

### ७.१ प्रत्याहारसूत्राणि वस्तुतः पाणिनीयानि

एतेषां भ्रान्तेः कारणं तन्निवारणोपायञ्चात्र प्रस्तूयते । अन्ये आचार्यास्तु इमानि सूत्राणि पाणिनीयानि सन्तीति दाढ्र्यम् प्रकटयन्ति । एतेषां पाणिनीयत्वे बहूनि प्रमाणानि दृश्यन्ते ।
प्रथमतो आदिमध्यान्तशब्दानां प्रयोगविषयं विचार्यते । भाष्यकारः पतञ्जलिः पाणिनीयसूत्राणि व्याख्यायन् ग्रन्थस्यादिमध्यावसानेषु त्रिधा मङ्गलमाचरितीति सूचयति । सः भूवादयो धातवः १।३।१ सूत्रे वकारागमं मङ्गलार्थमिति स्वीकरोति । परन्त्वत्र मध्यशब्दो मुख्यार्थे नास्ति । तथा च भूवादयो धातव : इति सूत्रमपि ग्रन्थस्य मध्यभागे नास्ति तत्तु प्रथमाध्याये विराजते ।

तथा च काशिकाकारेण नोदात्तस्वरितोदयम् ८।४ ६७ सूत्रे उदात्तपरस्येति वक्तव्ये उदयग्रहणम् ग्रन्थान्ते मङ्गलार्थमुक्तम् । अत्राप्यन्त्य शब्दो मुख्यार्थेऽप्रयुक्तो विलोक्ते । तथा च एतत् सूत्रम् अन्त्ये पठितम् । यदि इदमेवान्त्यं स्यात् तर्हि पाणिनेः अ अ ८। ४। ६८ सूत्रमपि अपाणिनीयं स्यात् । एतेनात्र प्रयुक्ताः आदिमध्यान्तशब्दाः स्वसमीपवाचकाः लाक्षणिकार्थकाः सन्ति इति स्पष्टम् भवति । निरुक्तादिषु चैतादृशः लाक्षणिकः प्रयोगोपलभ्यते । अतः एभिः प्रमाणैः प्रत्याहारसूत्राणि अपाणियानिति साधयितुं नैव शक्यते ।

तथा च पाणिनीय सूत्रेषु प्रत्याहाराणाम् येन प्रकारेण सूक्ष्मतया ग्रथितम् लभ्यते, तद् तेषामपाणि-नीयत्वे ऽ सम्भवं प्रतीयते । महाभाष्यकारः पतञ्जलिः पाणिनीयसूत्रेषु इव एतेषामपि व्याख्यानं करोति । एवञ्च प्रत्याहाराह्निके एतानि पाणिनियानि सूत्राणि समुल्लिखति व्याख्यायति च । पाणिनि विरचितस्याष्टाध्यायी ग्रन्थे आदौ यद्यपि वृद्धिरादेच् सूत्रं विद्यते तथापि अथ शब्दानुशासनम् तथा प्रात्याहारसूत्राणि अष्टाध्याय्याः अङ्गत्वमावहन्ति । एवञ्च पाणिनीय शिक्षा, आपिशलशिक्षा ग्रन्थेषु प्रथमस्थानप्रकरणात् पूर्वपठिता उपोद्घातरूपादीनि सूत्राणि प्रकरणाद् बहिर्भूतान्यपि शिक्षायाः अङ्गत्वमावहन्ति । एतेन च प्रत्याहारसूत्राणि पाणिनीयानि एव इति सिद्धं भवति । प्रमाणप्रस्तोतनपुरस्सरम् नवीनाः दयानन्द सरस्वती प्रभृतयः प्रत्याहारसूत्राणि पाणिनीयानि स्वीकुर्वन्ति । भट्टोजी दीक्षितस्य तथा काशिकाकारस्य मतं च एतेषां पाणिनीयत्वं साधयन्ति । महेश्वरात् आशीर्वादरूपेण सूत्राणि पाणिनिना प्राप्तिानि इति सत्यं स्यात् । पाणिनिना गोपर्वते तपः कृत्वा सूत्राणि आशीर्वादरूपेण लब्धे सत्यपि रचितानि ग्रथितानि तु पाणिनिनैव सम्भवेत् । एतेन च प्रत्याहारसूत्राणि पाणिनि रचितानीति स्पष्टं भवति । अत्र क कोऽपि विवादावसरः ।

## ८. निष्कर्षः

महर्षिणा पाणिनिना विरचिता अष्टाध्यायी व्यारणस्य महत्त्वपूर्णा कालजयी कृतिः वर्तते । एषा संस्कृतव्याकरणस्याधारशीला विद्यते । प्रत्याहारसूत्राणि अष्टाध्याय्याः अभिन्नाङ्गत्वमावहन्ति । एतानि हेश्वरवरप्रसादात् पाणिनिना लब्धत्वात् माहेश्वराणि सूत्राणि कथितानि सन्ति । अन्येषु व्याकरणेषु च प्रत्याहारसूत्राणाम् पाणिनीयत्वं समुल्लिखितम् प्राप्यते । तेषां प्रत्याहारसूत्रायामुपस्थितिरपि एतेषां सूत्राणं महन्महत्त्वं प्रतिपादयति । पाणिनीयव्याकरणस्य ज्ञानाय एतेषां प्रत्याहारसूत्राणां ज्ञानमत्यावश्यकम् भवति ।

## सन्दर्भग्रन्थसूची


अशोकचन्द्रः, (२०५२), *व्याकरणशास्त्रस्येतिहासः,* वाराणसी : धर्मराज प्रेसः ।

दीक्षितः, भट्टोजी (सन् १९९६), *वैयाकरणसिद्धन्तकौमुदी,* (व्या.गोपालदत्त पाण्डेय), वाराणसी : चौखम्बा सुरभारती प्रकाशनम् । (बालमनोरमासहिता)(प्रथमः, द्वितीयः, तृतीयः, चतुर्थः भागाः) ।

दीक्षितः, भट्टोजी (सन् १९९८), *प्रौढमनोरमा* (शब्दरत्नसहिता), वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।

नागेशः, (२०४५), *लघुशब्देन्दुशेखरः,* (व्या. ब्रह्मदत्त द्विवेदी) पटना : सुशील प्रकाशनम् ।

पतञ्जलिः, (२०५७), *व्याकरणमहाभाष्यम्,* (व्या.चारुदेव शास्त्री) नयाँ दिल्ली : मोतीलाल बनारसीदासः ।

पाणिनिः, (२०३६), *अष्टाध्यायी* (सम्पा. गोपाल शास्त्री), वाराणसी : चौखम्बा सुरभारती प्रकाशनम् ।

पाणिनिः, (२०७०), *अष्टाध्यायी* (व्या. ईश्वरचन्द्र) दिल्ली, चौखम्बा संस्कृत प्रतिष्ठानम् ।

युधिष्ठिरः, मीमांसकः (सन् २०१४), *संस्कृत व्याकरणशास्त्रका इतिहास,* (सम्पा.रामनाथ त्रिपाठी) वाराणसी : चौखम्बा पब्लिसर्स ।

वामनजयादित्यौ, (सन् २००६), *काशिका,* (व्या.रघुवर वेदालङ्कारः), वाराणसी : चौखम्बा ओरिएन्टलिया ।

सिग्द्याल, सोमनाथः (२०१७), *प्रतिसंस्कृता सिद्धान्तकौमुदी,* काठमाडौं : नेपाल रा.प्र. प्रतिष्ठानम् ।